राजनि० । ७देवभेदे पु० । वाजिनशब्दे दृश्यम् ।

**वाजिन** पु० वाजिभ्यो देयम् अण् । आमिक्षानिःसृतजले "तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्" इति श्रुतिः ।

**वाजिपृष्ठ** पु० वाजिन इव पृष्ठमस्य । अम्लानवृक्षे शब्दच० ।

**वाजिभक्ष** पु० भक्ष्यते भक्ष–कर्मणि घञ् ६त० । चणके, राजनि० । [मुद्गे राजनि० ।

**वाजिभोजन** पु० वाजिभिर्भुज्यते भुज–कर्मणि ल्युट् ।

**वाजीकरण** न० अवाजी वाजीव क्रियतेऽनेन वाजिन्+च्वि कृ-ल्युट् । "यद्द्रव्यं पुरुषं कुर्यात् वाजिवत् सुरतक्षमम् । तद्वाजीकरणं ख्यातम्" इत्युक्ते वीर्यवृद्धिकरणे औषधभेदे । सुश्रुते दृश्यम् ।

**वाञ्छा** स्त्री वाछि–अ । इच्छायाम् इष्टसाधनताधीजन्येऽभीष्टविषये चित्तवृत्तिभेदे अमरः ।

**वाट** पु० वट–घञ् । १पथि २वृतिस्थाने च मेदि०गौरा०ङीष् ४वास्तुभूमौ ५कुटर्यां स्त्री मेदि० । ६वाट्यालके शब्दर० ।

**वाटिका** स्त्री वट–ण्वुल् । १वास्तुभूमौ (वेड़ियाला) २क्षुपे ३हिङ्गुपत्र्याञ्च शब्दच० । [क्षुपभेदे रत्नमा० ।

**वाट्या** स्त्री वाट्यै हिता तत्र साधुर्वा यत् । (वेड़ियाला)

**वाट्याल** पु० वाटीमलति भूषयति अल–अण् । (वेड़ियाला) क्षुपभेदे शब्दर० गौरा० ङीष् तत्रैव स्त्री । ण्वुल् । वाट्यालक तत्रार्थे पु० शब्दर० । [अवाडिष्ट ।

**वाड** आप्लावे भ्वा० आ० अक०सेट् चङि न ह्रस्वः । वाडते

**वाढ** न० वह–क्त नि० । १अतिशये २तद्युक्ते त्रि० अमरः । पृषो० सम् । वाढम् ३प्रतिज्ञायां ४स्वीकारे च अव्य० अमरः ।

**वाण** पु० वण–घञ् । १शरे अमरः २गवां स्तने ३दैत्यभेदे ४केवले मेदि० ५वह्नौ त्रिका० ६काण्डावयवे विश्वः ७भद्रमुञ्जे राजनि० कादम्बरीग्रन्थकारके ८कविभेदे च "पञ्चवाणस्तु वाणः" इति प्रसन्नराघवम् ।९नीलझिण्ट्यां पुंस्त्री० अमरः । अश्रोष्ट्रादित्वमित्यन्ये । [शब्दर० ।

**वाणपुर** न० ६त० । शोणितपुरे (कोट्टरी) पुराख्ये पुरभेदे

**वाणवार** पु० वाणं परसन्धानशरं वारयति वृ० वृ–अण् । योधादिस्थोलाकारे सन्नाहे कवचे शब्दच० ।

**वाणहन्** पु० वाणं तन्नामासुरं हतवान् हन–ताडने भूते क्विप् । श्रीकृष्णे वाणजिदादयोऽप्यत्र ।

**वाणि** स्त्री वण–इण् वा ङीप् । १वयने अमरः २वयनदण्डे ३मूल्ये ४सरस्वत्यां हेमच० । ५वाक्ये ६तद्देवतायाञ्च अमरः ङीप् ।

**वाणिनी** स्त्री वण–णिनि ङीप् । १नर्त्तक्यां २छेके ३मत्तस्त्रियाम् हेमच० । वाण+अस्त्यर्थे इनि । ४शरयुते त्रि० ।

**वात** गतौ सेवायां सुखीकरणे च सक० अद० चु०उभ०सेट् । वातयति ते अववातत् त ।

**वात** पु० वा–क्त । स्पर्शमात्रविशेषगुणके भूतभेदे १पवने अमरः । अनिलशब्दे १६४पृ० दृश्यम् । २देहस्थे धातुभेदे च । ३गन्तरि त्रि० । जारे ५धृष्टनायके च "प्रभातवाता वहतीति" भट्टिः । ६वातजन्ये रोगभेदे भावप्र० यथा "कषायकटुतिक्तकप्रमितरूक्षलघ्वन्नतः पुरःपवनजागरप्रतरणाभिघातश्रमैः । हिमादनशनात् तथा निधुवनाच्च धातुक्षयात् मलादिरयधारणात् मदनशोकचिन्ताभयैः । अतिद्रुतजमोक्षणात् गदकृतातिमांसक्षयादतीव वमनात् तृषामतिविरेचनादामतः । पयोदसमये दिनक्षयदयोस्तृतीयांशयोर्जरामतिगतेऽशिते शिशिरसंज्ञकालेऽपि च । देहे स्रोतांसि रिक्तानि पूरयित्वाऽनिलो बली । करोति विविधान् रोगान् सर्वाङ्गैकाङ्गसंश्रयान्" । प्रमितत्वात् वैपरीत्ये प्रापसर्गस्तेन अपरिमितमित्यर्थः । प्रकर्षेण मितमल्पं वा लघ्वन्नम् अतिपुराणं शाल्यादि । कतिचिदन्नानि नवान्यपि वातलानि यत आह गुणरत्नमालायाम् "नीवारस्त्रिपुटः सतीनचणकः श्यामाककुद्दालकौनिष्पावाश्च मकुष्टकश्च वरठामकुल्लकः कोद्रवः" । एते वातकरा इति शेषः । नीवारः प्रसाधिका (चीना) इति लोके । त्रिपुटः (खसारी) । सतीनः कलायः । निष्पावो राजमाषः । (वरवटी) इति लोके । मकुष्टकः (माठा) इति लोके । वरठा वरटिका (वररै) इति लोके । मकुल्लकः (मसूरी) इति लोके । पुरःपवनः प्राग्वातः, आमतः आमेन मार्गावरणात् । यत उक्तम् वायोर्धातुक्षयात् कोपो मार्गस्यावरणेन चेति" । पयोदसमये वर्षासु । जरामतिगतेऽशिते भुक्तेऽजीर्णताङ्गते । देहे स्रोतांसीत्यादिना संप्राप्तिरुक्ता । कषायादिभिर्हेतुभिर्वर्षादौ समये हेतुमते बली अनिलः प्रवृद्धो वायुः करोति विविधान् रोगान् । ते रोगाः कथ्यन्ते "शिरोग्रहोऽल्पकेशत्वं जृम्भात्यर्थं हनुग्रहः । जिह्वास्तम्भो गद्गदत्वं मिन्मिनत्वञ्च मूकता । वाचालता प्रलापश्च रसानामनभिज्ञता । बाधिर्यं "कर्णनादश्च स्पर्शाज्ञत्वं तथार्दितम् । मन्यास्तम्भोऽथ मणितो बाहुशोषोपबाहुकः । अर्दिता चैव विश्वाची ऊर्द्ध्वं१ ात उदीरित